# श्री महालक्ष्मी अष्टकं

नमस्तेस्तु महामाये श्रीपीठे सुरपूजिते |
शङ्ख चक्र गदा हस्ते महालाक्ष्मीम नमोस्तु ते || १ ||

नमस्ते गरुडारूढे कोलासुर भयङ्करि |
सर्वपाप हरे देवि महालाक्ष्मीम नमोस्तु ते || २ ||

सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि |
सर्वदु:खहरे देवि महालाक्ष्मीम नमोस्तु ते || ३ ||

सिद्धि बुद्धि प्रदे देवि भुक्ति मुक्ति प्रदायिनि |
मन्त्रपूते सदा देवि महालाक्ष्मीम नमोस्तु ते || ४ ||

आद्यन्त रहिते देवि आद्यशक्ति महेश्वरि |
योगजे योगसम्भूते महालाक्ष्मीम नमोस्तु ते || ५ ||

स्थूल सूक्ष्म महारौद्रे महाशक्ति महोदरे |
महापाप हरे देवि महालाक्ष्मीम नमोस्तु ते || ६ ||

पद्मासन स्थिते देवि परब्रह्म स्वरूपिणि |
परमेशि जगन्मात: महालाक्ष्मीम नमोस्तु ते || ७ ||

श्वेताम्बर धरे देवि नानालङ्कार भूषिते |
जगत्स्थिते जगन्मात: महालाक्ष्मीम नमोस्तु ते || ८ ||

महालक्ष्म्यष्टकं स्तोत्रं य: पठेद्भक्ति मान्नर: |
सर्वसिद्धि मवाप्नोति राज्यं प्राप्नेति सर्वदा || ९ ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

एककाले पठेन्नित्यं महापाप विनाशनम् |
द्विकालं य: पठेन्नित्यं धनधान्य समन्वित: || १० ||

त्रिकालं य: पठेन्नित्यं महाशत्रु विनाशनम् |
महालक्ष्मी र्भवेन्नित्यं प्रसन्ना वरदा शुभा || ११ ||

## इति इन्द्र कृत श्री महालक्ष्मी अष्टकं सम्पूर्ण

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133